SUṢAMĀ : Multidisciplinary Research Journal ISSN: 3107-4529
(International Peer-Reviewed & Refereed Journal)
Vol. 1, Issue-3, (Jul-Sep) 2025

# रघुवंशमहाकाव्ये अव्ययीभावसमासस्य प्रयोगविमर्शौ
## Raghuvaṃśamahākāvye avyayībhāvasamāsasya prayogavimarśau

**Tuhin Mandal**
Research Scholar
Ramakrishna Mission Vivekananda Educational and Research Institute
Belur Math, Howrah, West Bengal, India
E-mail: tuhinmandal55@gmail.com

**Dr. Rakesh Das**
Assistant Professor & HOD, Dept. of Sanskrit & Philosophy
Ramakrishna Mission Vivekananda Educational and Research Institute
Belur Math, Howrah, West Bengal, India
E-mail: rakdas@gmail.com

**Abstract:** कविकुलगुरोः कालिदासस्य निरवद्या साहित्यकृतिः रघुवंशम् इति महाकाव्यम्। महाकाव्येऽस्मिन् महाकविना रघुवंशीयनृपाणां वंशवर्णनं विहितम्। तत्र ऊनत्रिंशत्-राज्ञां चरितवर्णनं लभ्यते। ऊनविंशतिसर्गात्मके अस्मिन् महाकाव्ये रघूणां वंशवर्णनावसरे कालिदासेन समासवृत्तेः आश्रयः कृतः। कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः। एताः पञ्च वृत्तयः अपि रघुवंशे परिलक्ष्यन्ते। परन्तु सर्वापेक्षया आधिक्यम् अस्ति समासवृत्तेः। तत्रापि पञ्चविधेषु समासेषु तत्पुरुषसमासस्यैव आधिक्यम्। केवलसमासः, अव्ययीभावः, द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः इति समासानां पञ्च भेदाः। अस्मिन् प्रबन्धे वयं सम्पूर्णमहाकाव्ये अव्ययीभावसमासविषये आलोचयामः। तथाहि अस्मिन् काव्ये अव्ययीभावसमासस्य संख्या कियती विद्यते, कुत्र कुत्र अव्ययीभावसमासस्य प्रयोगः अस्ति, प्रयोगः पाणिनीयः अस्ति न वा, यस्मिन् पदे अव्ययीभावसमासः विद्यते तस्य विग्रहवाक्यं किं भवति, व्याख्यानादिषु क्वचित् विग्रहवाक्यं दोषयुक्तं लभ्यते वा, इत्यादिविषयाः अस्मिन् प्रबन्धे आलोच्यन्ते।

**Keywords:** रघुवंशम्, कालिसासः, अव्ययीभावः, समासः, विग्रहवाक्यम्।

**भूमिका**— केवलसमासः, अव्ययीभावः, द्वन्द्वः, तत्पुरुषः, बहुव्रीहिः इत्येवंभेदेन समासः पञ्चविधः। एतेषु अव्ययीभावसमासः अन्यतमः। अव्ययीभावसमासविधायकं मुख्यं सूत्रं भवति- अव्ययं "विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्य-सादृश्यसम्पत्तिसाकल्यान्तवचनेषु"[1] इति। सूत्रस्यास्य सामान्यार्थः भवति— विभक्त्याद्यर्थे विद्यमानम् अव्ययं समर्थेन सुबन्तेन सह विकल्पेन समस्यते, स च अव्ययीभावसंज्ञकः भवति इति। अव्ययीभावसमासे कृते "अव्ययीभावश्च" इति सूत्रेण समस्तं पदम् अव्ययसंज्ञकं भवति। यथा हरौ इति विग्रहे हरि ङि अधि इत्यलौकिकविग्रहे अव्ययं विभक्ति इत्यादिसूत्रेण

अव्ययीभावसमासे समुदायस्य समासत्वात् प्रातिपदिकसंज्ञायां सुब्लुकि हरि अधि इति जाते अधि इति अव्ययस्य उपसर्जनसंज्ञायां पूर्वनिपाते अधिहरि इति जाते एकदेशविकृतन्यायेन समुदायस्य प्रातिपदिकत्वाक्षत्या प्रथमैकवचनविवक्षायां सुप्रत्यये अव्ययत्वात् सुब्लुकि अधिहरि इति रूपं भवति। यदि समस्तं पदम् अदन्तं भवति तदा "नाव्ययीभावादतोऽम्त्वपञ्चम्याः"[2] इति सूत्रेण पञ्चमीं विहाय सर्वासु विभक्तिषु अमादेशः विधीयते। यथा अधिगोपम्, उपकृष्णम् इत्यादि। तत्रापि तृतीयासप्तम्योः विकल्पेन अमादेशः भवति। तेन तृतीयासप्तम्योः उपकृष्णेन उपकृष्णे इत्यादिरूपाणि विकल्पेन भवन्ति।

इदानीं रघुवंशमहाकाव्ये ऊनविंशतिसर्गेषु येषु पदेषु अव्ययीभावसमासः विद्यते तानि पदानि आलोच्यन्ते। अत्र सर्गशः वयं पश्यामः कुत्र कुत्र अव्ययीभावसमासः विद्यते। ततः पदानि संगृह्य अव्ययीभावसमासस्य पर्यालोचनम् अत्र विधीयते। अत्र केवलं पदानि उद्ध्रियन्ते। तत्पार्श्वे सर्गसंख्या किञ्च श्लोकसंख्या उल्लिख्यते।

**आजन्मशुद्धानाम् (१/५)**— अस्मिन् पदे आजन्म इत्यस्मिन् अंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति जन्मनः आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्यययस्य पञ्चम्यन्तेन जन्मन् ङसि इत्यनेन सह अव्ययीभावसमासः। अत्र विधायकं सूत्रं भवति "आङ्मर्यादाभिविध्योः"[3] इति। आजन्म इत्यस्य जन्मनः आरभ्य इत्यर्थः।

**आफलोदयकर्मणाम् (१/५)**— अस्मिन् पदे आफलोदयम् इत्यंशे अव्ययीभावसमासः विद्येत। तथाहि विग्रहवाक्यं भवति फलोदात् आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्यययस्य पञ्चम्यन्तेन फलोदय ङसि इत्यनेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः। फलोदयपर्यन्तम् इत्यर्थः।

**आसमुद्रक्षितीशानाम् (१/५)**— अस्मिन् पदे आसमुद्रम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति समुद्रात् आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्यययस्य पञ्चम्यन्तेन समुद्र ङसि इत्यनेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः। समुद्रपर्यन्तम् इत्यर्थः।

**आनाकरथवर्त्मनाम् (१/५)**— अस्मिन् पदे आनाकम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति नाकात् आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्यययस्य पञ्चम्यन्तेन नाक ङसि इत्यनेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः। स्वर्गपर्यन्तम् इत्यर्थः।

**यथाविधिहुताग्नीनाम् (१/६)**— अस्मिन् पदे यथाविधि इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति विधिम् अनतिक्रम्य इति। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य विधि अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः। तद्विधायकं सूत्रं भवति अव्ययं विभक्ति.. इति।

**यथाकामार्चितार्थिनाम् (१/६)**— अस्मिन् पदे यथाकामम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति कामम् अनतिक्रम्य इति। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य काम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः।

**यथापराधदण्डानाम् (१/६)**— अस्मिन् पदे यथापराधम् इत्यत्र अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति अपराधम् अनतिक्रम्य इति। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य काम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः।

**यथाकालप्रबोधिनाम् (१/६)**— अस्मिन् पदे यथाकालम् इत्यत्र अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति कालम् अनतिक्रम्य इति। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य काम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः। अत्रापि पूर्ववत्समासः।

**अर्घ्यानुपदम् (१/४४)**— अस्मिन् पदे अनुपदम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि पदस्य पश्चात् इति विग्रहे अव्ययीभावसमासे अनुपदम् इति रूपं निष्पद्यते। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य पद ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः। "अव्ययं विभक्ति"[4] इत्यादिसूत्रेण अत्र समासः। अदन्तत्वात् "नाव्ययीभाववादतोऽम्त्वपञ्चम्याः"[5] इति सूत्रेण अत्र विभक्तेः अम्भावे अनुपदम् इति रूपं भवति।

**अनुवेलम् (३/५)**— वेलायाः पश्चात् इति विग्रहे अव्ययीभावसमासे अनुवेलम् इति रूपं निष्पद्यते। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य वेला ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः। "अव्ययं विभक्ति" इत्यादिसूत्रेण अत्र समासः। "अव्ययीभावश्च"[6] इति सूत्रेण अत्र नपुंसकलिङ्गत्वम्। किञ्च "ह्रस्वो नपुंसके प्रातिपदकस्य"[7] इति सूत्रेण अत्र वेलाशब्दस्य आकारस्य ह्रस्वे अकारः जायते। किञ्च अदन्तत्वात् "नाव्ययीभाववादतोऽम्त्वपञ्चम्याः"[8] इति सूत्रेण अत्र विभक्तेः अम्भावे अनुवेलम् इति रूपं भवति।

**यथाक्रमम् (३/१०)**— क्रमम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाक्रमम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य क्रम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथागतम् (३/६७)**— आगतम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथागतम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य आगत अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथाविधि (३/७०)**— विधिम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाविधि इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य विधि अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**आकुमारकथोद्घातम् (४/२०)**— अस्मिन् पदे आकुमारम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति कुमाराद् आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्ययस्य पञ्चम्यन्तेन कुमार ङसि इत्यनेन सह अव्ययीभावसमासः। अत्र विधायकं सूत्रं भवति "आङ्मर्यादाभिविध्योः"[9] (अष्टा. २.१.१३) इति।

**आपादपद्मप्रणताः (४/३७)**— अस्मिन् पदे आपादपद्मम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति आ पादपद्मात् इति। अत्र मर्यादार्थे विद्यमानस्य आङ् इति अव्ययस्य पञ्चम्यन्तेन पादपद्म ङसि इत्यनेन सह अव्ययीभावसमासः।

**यथाकामम् (४/५१)**— कामम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाकामम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य काम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथावकाशम् (६/१४)**— अवकाशम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथावकाशम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य अवकाश अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथाभागम् (६/१९)**— भागम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाभागम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य भाग अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथाप्रदेशम् (६/८३)**— प्रदेशम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाप्रदेशम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य प्रदेश अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**आकर्णकृष्टा (७/५७)**— अस्मिन् पदे आकर्णम् इत्येत्र अव्ययीभावसमासः विद्यते। तथाहि कर्णात् आ इति विग्रहे अव्ययीभावसमासे आकर्णम् इति रूपम् निष्पद्यते। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्ययस्य पञ्चम्यन्तेन कर्ण ङसि इत्यनेन सह अव्ययीभावसमासः।

**अधिज्यकार्मुकः (८/२७)**— अस्मिन् पदे अधिज्यम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि ज्यायाम् इत्यस्ति विग्रहवाक्यम्। अत्र विभक्त्यर्थे अधि इति अव्ययस्य ज्या ङि इति सप्तम्यन्तेन सह समासः जातः। ह्रस्वो नपुंसके प्रातिपदकस्य इति सूत्रेण अत्र ज्याशब्दस्य आकारस्य ह्रस्वः जायते।

**यथाक्रमम् (९/२६)**— क्रमम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाक्रमम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य क्रम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथासुखम् (९/४८)**— सुखम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथासुखम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य सुख अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**आकर्णकृष्टम् (९/५७)**— अस्मिन् पदे आकर्णम् इत्यत्र अव्ययीभावसमासः विद्येत। तथाहि विग्रहवाक्यं भवति कर्णात् आ इति। कर्णपर्यन्तम् इत्यर्थः। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्ययस्य पञ्चम्यन्तेन कर्ण ङसि इत्यनेन सह अव्ययीभावसमासः।

**आकर्णविकृष्टभल्लवर्षी (९/६६)**— अस्मिन् पदे आकर्णम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति कर्णात् आ इति। कर्णपर्यन्तम् इत्यर्थः। पूर्ववत्समासः।

**यथाक्रमम् (११/३०)**— क्रमम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाक्रमम् इति रूपं निष्पद्यते। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य क्रम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**अनुपदम् (११/३१)**— पदस्य पश्चात् इति विग्रहे अव्ययीभावसमासे अनुपदम् इति रूपं निष्पद्यते। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य पद ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः।

**यथास्वम् (१३/२२)**— स्वम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथास्वम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य स्व अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**उपान्तवानीरवनोपगूढानि (१३/३०)**— अस्मिन् पदे उपान्तम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि अन्तस्य समीपम् इति विग्रहे अव्ययीभावसमासे उपान्तम् इति रूपम्। अत्र समीपार्थे विद्यमानस्य उप इति अव्ययस्य षष्ठ्यन्तेन अन्त ङस् इत्यनेन सह अव्ययीभावसमासः।

**अनुगोदम् (१३/३५)**— गोदायाः समीपम् इति विग्रहे अव्ययीभावसमासे अनुगोदम् इति रूपम्। अत्र समीपार्थे विद्यमानस्य अनु इति अव्ययस्य षष्ठ्यन्तेन गोदा ङस् इत्यनेन सह अव्ययीभावसमासः। अत्र विधायकं सूत्रं भवति "अनुर्यत्समया"[10] इति।

**अनुगिरम् (१३/४९)**— गिरेः समीपम् इति विग्रहे अव्ययीभावसमासे अनुगिरम् इति रूपम्। अत्र समीपार्थे विद्यमानस्य अनु इति अव्ययस्य षष्ठ्यन्तेन गिरि ङस् इत्यनेन सह अव्ययीभावसमासः। अत्र समासविधायकं सूत्रं भवति "अनुर्यत्समया"[11] इति। ततः "गिरेश्च सेनकस्य"[12] इति सूत्रेण अत्र समासान्तः टच्प्रत्ययः विहितः।

**यथाक्रमम् (१४/२)**— क्रमम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाक्रमम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य क्रम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथाप्रार्थितम् (१४/२५)**— प्रार्थितम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाप्रार्थितम् इति रूपम्। अत्र पदार्थानतिवृत्यर्थे विद्यमानस्य यथा इति अव्ययस्य प्रार्थित अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**समक्षम् (१४/६१)**— अक्ष्णोः समीपम् इति विग्रहे अव्ययीभावसमासे समक्षणम् इति रूपम्। तथाहि समीपार्थे विद्यमानस्य सम् इत्यव्ययस्य अक्षि ओस् इति षष्ठ्यन्तेन सह अव्ययीभावसमासः। अत्र "अव्ययीभावे शरत्प्रभृतिभ्यः"[13] इति सूत्रेण अत्र समासान्तः टच्प्रत्ययः जातः।

**सपर्यानुपदम् (१४/८१)**— अस्मिन् पदे अनुपदम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति पदस्य पश्चात् इति। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य पद ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः।

**उपकूलम् (१५/२८)**— कूले इति विग्रहे अव्ययीभावसमासे कृते उपकूलम् इति रूपम्। अत्र विभक्त्यर्थे विद्यमानस्य उप इत्यव्ययस्य कूल ङि इत्यनेन सप्तम्यन्तेन सह समासः। अत्र समीपार्थे अव्ययीभावसमासः इति नाशङ्कनीयं, प्रसङ्गानुसारं कूले इत्यर्थस्य इष्टत्वात्।

**यथाविधि (१५/३१)**— विधिम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे यथाविधि इति रूपम्। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य विधि अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**राजोपपदम् (१६/४०)**— अस्मिन् पदे उपपदम् इत्यत्र अव्ययीभावसमासः विद्यते। पदस्य समीपम् इत्यस्ति विग्रहवाक्यम्। अत्र समीपार्थे विद्यमानस्य उप इत्यव्ययस्य पद ङस् इत्यनेन षष्ठ्यन्तेन सह समासः।

**यथाप्रधानम् (१६/४०)**— प्रधानम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे कृते यथाप्रधानम् इति रूपम्। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य प्रधान अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**प्रत्येकनिक्षिप्तपदः (१६/४७)**— अस्मिन् पदे प्रत्येकम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि एकस्मिन् एकस्मिन् इत्यस्ति विग्रहवाक्यम्। अत्र वीप्सार्थे विद्यमानस्य प्रति इत्यव्ययस्य एक ङि इति सप्तम्यन्तेन सह समासः जातः।

**अनुधूपवासम् (१६/५०)**— धूपवासस्य पश्चात् इति विग्रहे अव्ययीभावसमासे कृते रूपमिदं निष्पद्यते। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य धूपवास ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः।

**यथाकामम् (१६/७३)**— कामम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे कृते यथाकामम् इति रूपम्। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य काम अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**आजानुविलम्बिना (१६/८४)**— अस्मिन् पदे आजानु इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति जानुनः आ इति। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इति अव्ययस्य जानु ङसि इति पञ्चम्यन्तेन सह अव्ययीभावसमासः।

**यथेष्टगतयः (१७/२०)**— अस्मिन् पदे यथेष्टम् इत्यत्र अव्ययीभावसमासः विद्यते। अत्र विग्रहवाक्यं भवति इष्टम् अनतिक्रम्य इति। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य इष्ट अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**अनुवासरम् (१७/४४)**— वासरे वासरे अनु इति विग्रहे अत्र अव्ययीभावसमासः। अत्र वीप्सार्थे विद्यमानस्य अनु इत्यव्ययस्य वासर ङि इति सप्तम्यन्तेन सह अव्ययीभावसमासः जातः।

**यथाकालम् (१७/५१)**— कालम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे कृते यथाकालम् इति रूपम्। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य काल अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**यथास्वम् (१७/६५)**— स्वम् अनतिक्रम्य इति विग्रहे अव्ययीभावसमासे कृते यथास्वम् इति रूपम्। अत्र पदार्थानतिवृत्त्यर्थे विद्यमानस्य यथा इति अव्ययस्य स्व अम् इति द्वितीयान्तसुबन्तेन सह अव्ययीभावसमासः।

**आजानुविलम्बिबाहुम् (१८/२६)**— अस्मिन् पदे आजानु इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि जानुनः आ इति विग्रहे अत्र समासः। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इत्यव्ययस्य जानु ङसि इति पञ्चम्यन्तेन सह अव्ययीभावसमासः जातः।

**आब्रह्मसभम् (१८/२८)**— आ ब्रह्मसभायाः इति विग्रहे अत्र अव्ययीभावसमासः जातः। अत्र अभिविध्यर्थे विद्यमानस्य आङ् इत्यव्ययस्य ब्रह्मसभा ङसि इति पञ्चम्यन्तेन सह अव्ययीभावसमासः जातः। "ह्रस्वो नपुंसके प्रातिपदिकस्य"[14] इति सूत्रेण अत्र आकारस्य ह्रस्वत्वम्।

**अधिहस्ति (१८/३९)**— हस्तिनि इति विग्रहे अत्र अव्ययीभावसमासः। अत्र विभक्त्यर्थे अधि इति अव्ययेन सह हस्तिन् ङि इति सप्तम्यन्तस्य अव्ययीभावसमासः।

**अनुपृष्ठसंस्थितः (१९/२८)**— अस्मिन् पदे अनुपृष्ठम् इत्यंशे अव्ययीभावसमासः विद्यते। तथाहि विग्रहवाक्यं भवति पृष्ठस्य पश्चात् इति। पश्चात् इत्यर्थे विद्यमानस्य अनु इति अव्ययस्य पृष्ठ ङस् इति षष्ठ्यन्तसुबन्तेन सह अव्ययीभावसमासः।

**उपसंहारः**— एवं रघुवंशमहाकाव्ये अव्ययीभावसमासस्य पर्यालोचनं विहितम्। सम्पूर्णमहाकाव्ये साकल्येन अव्ययीभावसमासस्य संख्या भवति एकपञ्चाशत्। प्रतिसर्गं स्वल्पाः एव अव्ययीभावसमासः विद्यते। केषुचित् सर्गेषु एकोऽपि अव्ययीभावसमासस्य नितराम् अभावः दृश्यते। कुत्रचित् सर्गेषु एकमेव पद बहुधा आवृत्तम्। यथा यथाक्रमम्, यथाविधि इति पदानि। एवञ्च सर्गशः अव्ययीभावसमासस्य परिसंख्यानं पश्यामः चेत् एवं भवति—

## Endnotes

1. अष्टाध्यायी २.१.६
2. अष्टाध्यायी २.४.८३
3. अष्टाध्यायी २.१.१३
4. अष्टाध्यायी २.१.६
5. अष्टाध्यायी २.४.८३
6. अष्टाध्यायी २.४.१८
7. अष्टाध्यायी १.२.४७
8. अष्टाध्यायी २.४.८३
9. अष्टाध्यायी २.१.१३
10. अष्टाध्यायी २.१.१५
11. अष्टाध्यायी २.१.१५
12. अष्टाध्यायी ५.४.११२
13. अष्टाध्यायी ५.४.१०७
14. अष्टाध्यायी १.२.४७

## Bibliography


- रघुवंशमहाकाव्यम् सञ्जीवनी-संस्कृत-हरिप्रिया-हिन्दीव्याख्योपेतम्; कालिदासः; मल्लिनाथः, पण्डितलक्ष्मीप्रपन्नाचार्यः (व्याख्याकारौ); पण्डित-रामचन्द्र-झा व्याकरणाचार्यः (सम्पादकः); चौखम्बा कृष्णदास अकादमी, वाराणसी; २००७।
- रघुवंश-महाकाव्य, मल्लिनाथकृतसञ्जीवनीटीका धारादत्तमिश्रकृतसंस्कृतव्याख्या-हिन्दनुवादसहिता; कालिदासः; मल्लिनाथः, आचार्य धारादत्तमिश्रः (व्याख्याकारौ); मोतीलाल बनारसीदास; २०१७।
- रघुवंशमहाकाव्यम् सञ्जीवनीटीकायुत-मणिप्रभाहिन्दीव्याख्योपेतम्; कालिदासः; मल्लिनाथः, श्रीहरगोविन्दमिश्रः (व्याख्याकारौ); चौखम्भा संस्कृत संस्थान; वि. स. २०५९।
- वैयाकरणसिद्धान्तकौमुदी (द्वितीयो भागः) बालमनोरमातत्त्वबोधिनीसहिता; भट्टोजिदीक्षितः; वासुदेवदीक्षितः, ज्ञानेन्द्रसरस्वती (व्याख्याकारौ); गिरिधरशर्मा, परमेश्वरानन्दशर्मा च ( सम्पादकौ); मोतीलाल बनारसीदासः; २०१४।
- वैयाकरणसिद्धान्तकौमुदी, श्रीधरमुखोल्लासिनी हिन्दीव्याख्यासमन्विता (द्वियीयो भागः); भट्टोजिदीक्षितः; श्रीगोविन्दाचार्यः (व्याख्याकारः); लक्ष्मीशर्मा (सम्पादिका); चौखम्बा सुरभारती प्रकाशन, वाराणसी; २०१६।


——